# <u>लेखननियमाः</u>

१. अनुस्वारः = ं (रेखायाः उपरि बिन्दुः)

उदा-- यानं गच्छति | (नकारस्य उपरि अनुस्वारः अस्ति |)

२. शब्दान्ते अनुस्वारः अस्ति चेत्, अनुस्वारस्य पुरतः स्वरः अस्ति चेत्, तर्हि अनुस्वारस्य स्थाने 'म्' लेखनीयम् |

उदा-- गृहं + अस्ति = गृहम् अस्ति ~ शुद्धम्

गृहं अस्ति ~ अशुद्धम्

३. शब्दान्ते अनुस्वारः अस्ति चेत्, अनुस्वारस्य पुरतः व्यञ्जनम् अस्ति चेत्, तर्हि अनुस्वरः एव लेखनीयः |

उदा-- आपणं + गत्वा = आपणं गत्वा ~ शुद्धम्

आपणम् गत्वा ~ अशुद्धम्

४. पूर्णविरामात् पूर्वम् अनुस्वारस्य स्थाने 'म्' एव लेखनीयं, न तु अनुस्वारः |

उदा-- एकं यानं गतम् | ~ शुद्धम्

एकं यानं गतं | ~ अशुद्धम्

५. कस्य अपि पदस्य मध्ये अनुस्वारः अस्ति चेत्, अनुस्वारस्य पुरतः वर्गीय व्यञ्जनम् अस्ति चेत्, तर्हि अनुस्वारस्य स्थाने तस्य व्यञ्जनस्य वर्गस्य अन्तिमम् अक्षरं लेखनीयम् |

<u>वर्गीय व्यञ्जनानि – पञ्च वर्गाः</u>

कवर्गः – क, ख, ग, घ, ङ

चवर्गः – च, छ, ज, झ, ञ

टवर्गः – ट, ठ, ड, ढ, ण

तवर्गः – त, थ, द, ध, न

पवर्गः – प, फ, ब, भ, म

Swarup – June 2011

# उदाहरणानि

## कवर्गः

| अशुद्धम् | शुद्धम् |
|---|---|
| कंकणम् | कङ्कणम् |
| शंखः | शङ्खः |
| गंगा | गङ्गा |
| संघः | सङ्घः |

## चवर्गः

| अशुद्धम् | शुद्धम् |
|---|---|
| संचिका | सञ्चिका |
| प्रोंछः | प्रोञ्छः |
| अंजनम् | अञ्जनम् |
| झंझा | झञ्झा |

## टवर्गः

| अशुद्धम् | शुद्धम् |
|---|---|
| कंटकम् | कण्टकम् |
| कंठः | कण्ठः |
| अंडम् | अण्डम् |

## तवर्गः

| अशुद्धम् | शुद्धम् |
|---|---|
| अंतः | अन्तः |
| कंथा | कन्था |
| कंदम् | कन्दम् |
| अंधः | अन्धः |

## पवर्गः

| अशुद्धम् | शुद्धम् |
|---|---|
| कंपनम् | कम्पनम |
| तुंफनम् | तुम्फनम् |
| अंबा | अम्बा |
| अंभोधिः | अम्भोधिः |

## अभ्यासः

अधः सूचितेषु उदाहरणेषु अनुस्वारस्य अनन्तरं स्वरः अस्ति वा व्यञ्जनम् अस्ति वा इति सूचयित्वा मकारम् अनुस्वारं वा लिखतु |

उदा--

अ. अहं एकवारम् – (स्वरः) – अहम् एकवारम् |

आ. अहं सर्वदा – (व्यञ्जनम्) – अहं सर्वदा

१. गृहं + आगतः – ________

२. गृहं + गतः – _________

३. फलं + नीत्वा – ________

४. फलं + आनीय – ________

५. बालकं + आहूय – ________

६. तं + उक्त्वा – _________

७. तं + दृष्ट्वा – __________

८. शालां + गतवान् – ________

९. वृक्षं + आरुह्य – _________

१०. वार्तां + श्रुतवान् – ________

Swarup - June 2011

## लेखनस्य अभ्यासः – २

अधः सूचितेषु वाक्येषु लेखनदोषस्थलं ज्ञात्वा शुद्धं रूपम् लिखतु |

उदा-- सः गृहं आगत्य फलं खादितवान् | (गृहम् आगत्य )

१. गृहं आगतं मित्रं सः सत्कृतवान् | ________

२. फलं समीचीनं आसीत् | ____________

३. भवान् पुस्तकं अत्र स्थापयतु | ________

४. सः एतं विचारं अङ्गीकृतवान् | _________

५. अम्बा गच्छन्तं बालं आहूतवती | ________

६. आचार्यः उत्तमं वाक्यं उदाहरति | ________

७. एतं बन्धं उन्नयतु तावत् | ____________

८. आपणात् लवणं आलुकं च आनयतु | ______

९. सः मन्दिरं गत्वा मित्रम् नमस्करोति | ______

१०. अर्थं अवगत्य वाक्यं वदतु | _________

## लेखनस्य अभ्यासः – ३

अधः सूचितेषु उदाहरणेषु यत्र आवरणं निर्दिष्टं तत्र अनुस्वारः स्थाने चेत् "अ" चिह्नम्, अस्थाने चेत् "X" चिह्नं च लिखन्तु |

उदा-- सः अनुजं (X) आहूय एकं (अ) प्रश्नं (अ) पृष्टवान् |

१. तस्य वचनं ( ) अहं ( ) अङ्गीकृतवान् |

२. अहं ( ) सर्वदा उत्तमं ( ) पुस्तकं ( ) इच्छामि |

३. सा भिक्षुकं ( ) आहूय अन्नं ( ) व्यञ्जनं ( ) च दत्तवती |

४. पुस्तकं ( ) दृष्ट्वा सः एकं ( ) वाक्यं ( ) उक्तवान् |

५. माता फलं ( ) गृहीत्वा छुरिकां ( ) अन्विष्टवती |

६. पाठं ( ) पठतु इति अहं ( ) अनुजं ( ) उक्तवान् |

७. वयं ( ) गृहं ( ) आगत्य पाठं ( ) पठामः |

८. गीतं ( ) गायन्तीं ( ) अनुजां ( ) अग्रजः आहूतवान् |

९. निद्रां ( ) कृतवन्तं ( ) एतं ( ) मा उत्थापयतु |

१०. आगतं ( ) यानं ( ) दृष्ट्वा वयं ( ) धावितवन्तः |

## लेखनस्य अभ्यासः – ४

अधोनिर्दिष्टेषु शब्देषु अनुस्वारस्य अनन्तरं कस्य वर्गस्य व्यञ्जनम् अस्ति इति, तस्य वर्गस्य पञ्चमाक्षरं किम् इति च निर्दिश्य अन्ते शुद्धं रूपं निर्दिशन्तु |

| शब्दः | अनुस्वारस्य अनन्तरं स्थितस्य वर्गस्य नाम | तस्य वर्गस्य पञ्चमाक्षरम् | शुद्धरूपम् |
|---|---|---|---|
| १. अंकः | कवर्गः | ङ् | अङ्कः |
| २. कंकतम् | | | |
| ३. अंगम् | | | |
| ४. अंबुदः | | | |
| ५. कंधरः | | | |
| ६. स्पंदनम् | | | |
| ७. पंचमः | | | |
| ८. संधनम् | | | |
| ९. अंघ्रः | | | |
| १०. व्यंजनम् | | | |
| ११. मंडम् | | | |
| १२. कुंभः | | | |
| १३. शंठी | | | |
| १४. सिंधुरम् | | | |
| १५. दंभः, शृंखला, प्रपंचः, डिंडिमः, उंछवृत्तिः, मंथरा | | | |

Swarup - June 2011
(Material from abhyAsadarshinI)